श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवण्शठकोप श्रीश्रीनिवास यतीन्द्र महादेशिकैरनुगृहीतम्

# ॥ श्रीलक्ष्मीनृसिंह मङ्गळाशासनम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीलक्ष्मीनृसिंह मङ्गळाशासनम् ॥

अपारकरुणासिन्धो निवारणपरातिमान्।
विदारय हिरण्याक्षविदारण नखायुधैः॥ १ ॥

सर्ववेदान्तवेद्याय कारणाय महात्मने।
सर्वलोकशरण्याय श्रीनृसिंहाय मङ्गळम्॥ २ ॥

शेषिणे सर्ववस्तूनां वाञ्छितार्थप्रदायिने।
संश्रितानां सदा भूयात् श्रीनृसिंहाय मङ्गळम्॥ ३ ॥

पवित्राणां पवित्राय प्रापकाय फलात्मने।
भद्राणामपि भद्राय श्रीनृसिंहाय मङ्गळम्॥ ४ ॥

आदिवण् शठकोपाख्यैर्मुनिवर्यैर्महात्मभिः।
समर्चिताय नित्याय श्रीनृसिंहाय मङ्गळम्॥ ५ ॥

जगज्जन्मादिलक्ष्याय स्वेच्छास्वीकृतमूर्तये।
विध्वस्ताखिलहेयाय श्रीनृसिंहाय मङ्गळम्॥ ६ ॥

ज्ञानानन्दस्वरूपाय ज्ञानशक्त्यादिसिन्धवे।
बन्धवे सर्वलोकानां श्रीनृसिंहाय मङ्गळम्॥ ७ ॥

कायाधव परित्राण भावित स्तंभ जन्मने।
ब्रह्मेन्द्रादिस्तुताय स्यात् श्रीनृसिंहाय मङ्गळम्॥ ८ ॥

गुणलेशविहीनस्य सर्वहेयास्पदस्य मे।
मन्तून् क्षन्त्रेप्यनन्तान् स्यात् श्रीनृसिंहाय मङ्गळम्॥ ९ ॥

www.prapatti.com

श्रीनिवास यतीन्द्रोक्तं लक्ष्मीनृहरि मङ्गळम्।
ये पठन्ति महात्मानस्तेषां भूयात् तु मङ्गळम्॥ १०॥

॥ इति श्रीलक्ष्मीनृसिंह मङ्गळाशासनं संपूर्णम्॥

www.prapatti.com